## प्रर्थना

१. गुरर्ब्रह्मा गुरुर्विष्णुः
गुरुर्देवो महेश्वरः।
गुरुः साक्षात् परब्रह्मा
तस्मै श्री गुरवे मनः।।

२. संगच्छत्वं संवधत्वं
संवो मनांसि जानताम्।
देवाभागं यथापूर्वं
संजानाना उपासते।।

३. या कुन्देन्दु तुषारहार धवला
या शुभ्रवस्त्रावृता
या वीणावरदण्डमण्डितकरा
या श्वेतपत्मासना
याब्रह्माच्युत शङ्कर प्रभृतिभ्रि
देवै सदा पूजिता
सामां पातु सरस्वती भगवती
निश्शेष जाङ्यापः

४. ओंम् सहनाववतु सहनौभुनक्तु
सहवीर्यं करवावहै
तेजस्विना मधीतमस्तु मा विद्व्युषावहै
ओंम् शान्ति शान्ति शान्तिः

# बालदीपम्

# संस्कृत वार्षिकपुस्तकम्

विद्यालयीय संस्कृतसंघः एम्.पि.एम्.यु.पि.विद्यालयं मरत्तंकोट्



माणिक्यवीणामुपलालयन्ती
मदालसां मञ्चुलवाग्विलासां।
माहेन्द्रनीलद्धुतिकोमलांङ्की
मादंङ्ककन्यां मनसा स्मरामी।।

२०१२ मार्च् ३० प्रस्तुतीकरणम् विद्यालयीय संस्कृतसंघः

एम्.पि.एम्.यु.पि.विद्यालयम मरत्तंकोट्।

अक्षरविन्यासः- शैलजा पि. एम्, संस्कृताध्यापिका, एम्. पि. एम् माध्यमिकविद्यालयं, मरत्तंकोट्।
स्वकार्यवितरणार्थम्

# अक्षरक्रीडा

| | | |
|---|---|---|
| न दि त्रि प का | - | दिनपत्रिका। |
| थु शु मि क नम् | - | शुकमिथुनम्। |
| भा षि सु त म् | - | सुभाषितम्। |
| का आ वा श णी | - | आकशवाणी। |
| र वे का लः | - | कारवेलः। |
| ली त्र प म् ता | - | तालीपत्रम्। |
| च न प क्र मः | - | पचनक्रमः। |
| रो ह आ णम् | - | आरोहणम्। |
| कृ भा सं त स्कृ षा | - | संस्कृतभाषा। |
| भा सं ण ष न्दे शः स | - | संभाषणसन्देशः। |

हृदाया. ए . ए

५ - ए

## कवि परिचयः

## यूसफलि केच्चेरि ।

अस्मिन् काले अति प्रसिद्ध साहित्यकारः कविता रचयितः च भवति यूसफलि केच्चेरि। सः तृश्शूर् जिल्लायां केच्चेरि ग्रामे पुत्र कलत्रादिभिः साकं ससन्तोषं वसति। सः मातृभाषायां अनेकं कविताः रचिताः। तत् सर्वे मलयालचलचित्रे श्रोतुं शक्यते। यूसफलिः प्रसिद्धः संस्कृतगानरचयिता इति विख्यातः सः संस्कृत भाषायां अनेकं कविताः रचिताः। तेषु अन्यतमः भवति जानकी जाने इति संस्कृत चलचित्रगानम्। सः संस्कृत भाषा प्रेमी अस्मिन् भाषां पोषणां च कुर्वन्ति।



एम्.पि.एम्. माध्यमिकविद्यालयम्सप्तषष्ठितमं वार्षिकम्।

# विविध स्पर्धासु विजयिनः।

## छात्रवृत्तिपरीक्षायां उन्नतविजयं प्राप्तवन्ताः

२०११- २०१२ तमे वर्षे प्रचलिता संस्कृतं छात्रवृत्ति परीक्षायां गत वर्षे प्रचलिता शङ्कराचार्य संस्कृत सर्वकलाशालायाः आभिमुख्ये प्रचलिता माध्यमिकस्थरीय छात्र वृत्ति परीक्षायां च अनश्वरा, कण्णकी,अक्षयः उन्नतविजयं प्राप्तवन्ताः। अतुलजित्तः,अरुणः,विष्णुः.धन्या, गत वर्षस्य शङ्गराचार्य संस्कृत छात्रवृत्ति परीक्षायां च उन्नतस्थानं प्राप्तवन्तः।

अक्षयः



अनश्वरा



कण्णकी





धन्या,



अतुल्जित्तः



अरुणः एम्.ए



विष्णुः पि.एम्



**तेषां संस्कृतसंघस्य विद्यालयस्य च आशंसाः**

### संस्कृतभाषा

सर्वासां भारतीयभाषाणां जननी भवति संस्कृभाषा। देववाणी, अमरवाणी, गीर्वाणभारती इत्यादीनि नामान्तराणि सन्ति। रामायणं, महाभारतं, पञ्चमहाकाव्यानि, अष्टादशपुराणानि, षट् वेदाङ्गानि, सुभाषितानि, प्रसिद्ध गणित ग्रन्धः भास्कराचार्येण विरचितं लीलावती, ज्योतिषम्, विमानशास्त्रम् दइत्यादि सर्व ग्रन्धाणि संस्कृभाषायां रचितं भवति।

प्रतिवर्षं श्रावणपूर्णिमादिने विश्वे संसल्कृतदिनत्वेन आचरन्ति।कर्णाटका मत्तूर ग्रामे जनाः संस्कृभाषायां संम्भाषणं कुर्वन्ति। अस्मिन् भाषायां रचितं सुभाषितानि बाल्यकाले एव बालकाः पठितं चेत् तेषां सत्स्वभावरूपीकरणाय अत्यन्तं सहायकं भवति। केरलस्य मातृभाषा मलयालपठने संस्कृतभाषा अत्यन्तं प्रयोजनं कुर्वन्ति। अतः सर्वे भारतीयाः विशिष्या केरलीयाः संस्कृत पठनं अत्यन्तापेक्षितं करणीयम्।

विष्णु. पि. एम्।
७.सि

# उपजिल्ला, जिल्ला स्कूल् कलोल्सवविजयिनः

२०११- २०१२ विद्यालयीय उपजिल्ला, जिल्ला स्कूल् कलोल्सवे संसकृतोत्सवे अऱबिक् कलोत्सवे बालकलोत्सवे च अनघा,अञ्जना,धन्या,हृद्या,ज्योतिकाप्रीना,मत्सरे वन्देमातरं ए ग्रैट्,नीरजा. पि.जे,शालिनी संघगानमत्सरे च प्रथमस्थानीयाः। प्रीना केयुसंस्कृतपद्यं गानालापलं च द्वितीयस्थानं ए ग्रैट्च प्राप्तवती। सजित् कुमारः संस्कृतपद्यं गानालापलं च द्वितीयस्थानं ए ग्रैट् प्राप्तवान।अक्षयः,अनघा.च सिद्धरूपोच्चारण मत्सरेद्वितीयस्थानं प्राप्तवन्तः। कण्णकी नाटोटि नृत्तंकथाकथनं च बि ग्रैट् प्राप्तवती।

## तेषां संस्कृतसंघस्य विद्यालयस्य च आशंसाः

अनघा.



अञ्जना,



धन्या,



हृद्या,



ज्योतिका



प्रीना,



मन्या



शालिनी



कण्णकी



सजित्तः



### भग्नमनोरथः

कस्मिंश्चित् नगरे कश्चन दरिद्रः ब्राह्मणः वसति सम । सः भिक्षाटनेन जीवनं करोति स्म । एकदा सः पिष्टेन पूर्णं एकं घटं प्राप्तवान् । तं घटं नागदन्ते अवलम्ब्य तस्य अधः उपविश्य सः एकदृष्ट्या घटमेव पश्यति स्म।

एकदा रात्रौ सः चिन्तितवान् ‘यदि देशे दुर्भिक्षः भवेत् तर्हि एतस्य शतरूप्यकाणां मूल्यं भवेत् । तदा अहम् एतत् विक्रीय अजद्वयं क्रेष्यामि । कलानतरे अजसमूहः एव भविष्यति ।अननतरं अजसमूहं विक्रीय धेनूः क्रेष्यामि । अनन्तरं ताः विक्रीय महिषीः, ताः विक्रीय अश्वान् च क्रेष्यामि । एवं धनिकः भविष्यामि । गृहनिर्माणं करोमि । तदा कश्चित् ब्राह्मणः रूपवतीं स्वकन्यां मह्यं दास्यति ।अनन्तरं मम पुत्रः भविष्यति ।

यदा सः जानुभ्यां चलितुं समर्थः भविष्यति तदा अहम् अश्वशालायां पुस्तकं पठिष्यामि ।तदा पुत्रः जानुभ्यां सञ्चरन् मम समीपं आगन्तुं उद्युक्तः भविष्यति । तदा तं ग्रहितुम् तस्य मातरं आज्ञापयिष्यामि । यदा सा मम वचनं न श्रोष्यति तदा अहं पादप्रहारेण तां दण्डयिष्यामि’ इति । एवं चिन्तयन् सः पादप्रहारं कृतवान् ।तदा पिष्टेन पूर्णः घटः पतितः भग्नः च ।

*    *    *

## विद्यालयीय प्रवर्तिपरिचय गणितशास्त्र सामूह्यशास्त्र मेला विजयिनः

२०११- २०१२- विद्यालयवर्षीय विद्यालयीय गणितशास्त्र, सामूह्यशास्त्र, शास्त्र प्रवर्तिपरिचयमेलायां गणितचार्ट् रिस्ना, चित्ररचना फैजास्, तक्षकवृत्तिं सुबीषः कर्गजखण्डे पुष्पनिर्माणं धन्या, सुधाखण्ड निर्माणे यदुकृष्णः, शाका वर्णलेपनं नेजिता जालनिर्माणं अम्बिली, लोहप्रतले चित्ररचना अनेकः च प्रशस्त विजयं लब्धवन्तः। तेषां उपजिल्ला मत्सरे विशिष्ट प्रवर्त्तनेन प्रशंसा पात्रीभूताः अभवत्।

रिस्ना



नेजिता



अम्बिली



धन्या



सुबीषः



अनेकः



फैजासः



यदुकृष्णः



**तेषां संस्कृतसंघस्य विद्यालयस्य च आशंसाः**

## मूढाः चोराः

पुरा महाबलिपुरं ग्रामे कश्चन कृषकः वसति स्म। सः प्रभूतं धनं सम्पादितवान् । तस्य धनं चोराः अपहर्तुं इति विचिन्त्या सः अताव दुःखितवान्। एकदा रात्रौ तस्य गृहस्य समीपं केचन चोराः आगच्चत्। त्त ज्ञात्वा सः उच्चैः एवं विधं अवदत्। हे पुत्राः अस्माकं धनं सर्वं पेटिकायां निक्षिप्य वनान्तर्भागे कृक्षस्य अधः स्थापति वा? पुत्राः तेषां पित्रा उपायं ज्ञात्वा अनुवददति। हे पितः वयं पेटिकां वृक्षस्य अधः खननं कृत्वा स्थापयति। चोराः तेषां सम्भाषणं सत्यमिति मत्वा वनान्तर्भागे गच्छति स्म। किन्तु तस्मिन् वने अनेकं क्रूरमृगाणां वासस्थानं आसीत्। चोराणां आगमनं ज्ञात्वा सिंहः ते मारयन्ति खादन्ति च। पश्यता कृषकस्य बुद्धिकौशलम्।

अनघा. ऐन्.पि
षष्ठम कक्ष्या.



## *विद्यालयीय उपजिल्ला च अऱबिक् कलोत्सव विजयिनः कलोत्सवे च विजयिनः*








*२०११- २०१२- विद्यालयवर्षीय विद्यालयीय उपजिल्ला च अरबिक् स्कूळ् कलोत्सवे प्रशस्त विजयं प्राप्तवन्ताः जस्ना, षेहिदा, फस्ला, षहाना नस्रिन्, फौजासः च।*

**तेषां संस्कृतसंघस्य विद्यालयस्य च आशंसाः**

**समस्या पूरणम्।**

संस्कृति पूर्णं भारतं
वृक्ष पूरितं भारतम्।।
पर्वत परितः भारतम्
भारतं भाति शोभते।।

## काकस्य कौशलम्।

कथागानम्

एकः काकः ग्रामं गच्छति सः ग्रामं गच्छति
पिपासा तस्य बुभुक्षा पिपासया बुभुक्षया ग्रामं गच्छति।
तत्र गच्छति किमपि न लभते इतोऽपि गच्छति किमपि न लभते
श्रान्तः जायते खिन्न जायते किं च करोति
वामतः पश्यति दक्षिणतः पश्यति
दूरे दूरे पश्यति दूरे दूरे पश्यति।
स्वेदः जायते तृषः जायते
किं च पश्यति सः किं च पश्यति
पश्यति दूरे कूपः पश्यति दूरे घटं
कूपसमीपं घटं पश्यति सः
अनुक्षणं तन्मुखे रसः जायते
किं च करोति सः किं च करोति।
घटे उपरि उपविश्य अन्ते पश्यति
स्वेदः जायते श्रमः जायते
कारणं किंचित् जलं पश्यति किंचित् जलं
दुःखितः काकः कौशलं चिन्तयति
पाशाणखण्डे घटे पूरयति
शनैः शनैः दाहजलं आगच्छति
काकः जलं पीत्वा शीघ्रं गच्छति





कण्णकी. के एस्
पञ्चम कक्ष्या

## प्रश्नोत्तरी

१) कति वेदाः सन्ति?

उ. चत्वारि।

२) कलामण्डलं कुत्र वर्तते?

उ. तृश्शूर् जिल्लायां चेरुतुरुत्ति ग्रामे।

३) केरलस्य देशीयपुष्पम्?

उ. कर्णिकारम्।

४) योगशास्त्रस्य प्रामाणिक ग्रन्थः कः?

उ. पातञ्चलयोगसूत्रम्।

५. संगीतात्मकं वेदं किम्?

उ. सामवेदम्।

६. मम सत्यान्वेषणपरीक्षणं इति ग्रन्थस्य कर्ता कः?

उ. गान्धिजिः।

७. लोक महिला दिनं कदा?

उ. मार्च्च् ८

९ २००५ तमे वर्षे क्लासिक्कल् पदविं लब्दं य़भाषा किम्?

उ. संस्कृतम्।

१०. कति लकाराः सन्ति?

उ. दशम्।



जपा



कर्णिकारः



मन्दारम्



पाटलपुष्पम्



कुन्दपुष्पम्



कमलम्

### पुष्पगानम्

रक्तवर्णं जपापुष्पम्
पीतवर्णं कर्णिकारपुष्पम्।
श्नृवेतवर्णं मन्दारपुष्पम्
पाटलवर्णं पाटलपुष्पम्।
सुगन्धपुष्पं कुन्दपुष्पम्
देशीयपुष्पं कमलपुष्पम्।।

अतुलः ५. ए



# जीवनचरितम्



इन्दिरागान्धी १९१७ तमे वर्षे नवंम्बर् मासस्य १९ तमे दिने जनिम् अलभत। तस्य पिता नेहरु महोदयः पितामहः मोत्तिलाल् नेहरुः महोदयः, माता कमला नेहरुः च आसन्। सा शन्तीनेकतने यूरोप्प् देशे च विद्याभ्यासं कृतवती। १९४२ तमे वर्षे पिरोसगान्धिना सह विवाहितवती। तस्य पुत्रौ आस्तां राजीवः सञ्जीवः च। सा १९७१ तमे वर्षे भारतस्य प्रथानमन्त्रिपदं अलंकृतवती। सा १९८४ ओक्टोबर् ३१ तमे दिने दिवंगता।

अमृता दास्
७. सि



# ओणाघोषम्।



अनश्वरा. एन् . पि



केरलस्य देशीय उत्सवं भवति ओणम्। श्रावणमासे श्रावण दिने ओणम् आघुष्यते। अत्तं तः श्रावणपर्यन्तं दशदिनानि ओणम् आघोषयन्ति। आबालवृद्ध जनाः प्रभाते उत्तिष्ठन्ति नूतन वस्त्राणि धरन्ति। गृहनाथः बान्धवानां नूतन वस्त्राणि ओणप्पुटवा रुपेण वितरन्ति। विविध क्रीडासु निमग्नाः भवन्ति।

पुरा महावलिः नाम असुरचक्रवर्ति केरलान् अपालयत्। तस्य शासनकाले जनाः सन्तुष्टाः आसन्। महाबलिः तस्य प्रजानां दर्शनार्थं पातालात् आगमिष्यति इति सहङ्कल्पः। तस्य शासनकाले जनाः ऐक्य रुपेण जीवन्ति स्म। सर्वे केरलीयाः ओणाघोष वेलायां दशदिने गृहाङ्कणे पुष्पकोष्ठं रचयन्ति। नौकाकेलिः, शार्दूलकेलिः, तिरुवातिर केलिः, कन्दुककेलिः इत्यादयः क्रीडाः क्रीडन्ति। विदेशवासिनः बान्धवाः ओणाघोषसमये केरले आगच्छन्ति। कुटुम्बाङ्गाः च मिलित्वा सग्धिः कदली पत्रे वितरयित्वा भोजयन्ति च।



## वन्देमातरं

वन्देमातरं .........वन्देमातरम्
सुजलां सुफलाम मलयजशीतलाम्
सस्यश्यामलां मातरं...............
वन्दे मातरं .........................
शुभ्रज्योत्स्ना पुलकितयामिनीं
फुल्लकुसुमित द्रुमतल शोभिनीं
सुहासिनीं सुमधुरभाषिणीं
सुखदां वरदां मातरं..........
वन्दे मातरं......वन्दे मातरम्।।

## अक्षरश्लोकाः

१) आगमप्रणवपीठिकाममल वर्णमङ्गलशरीरिणीम्
आगमावयवशोभिनींमखिल पेदसारक-तशेखरीम्।
मूलमन्त्रमुखमण्डलां मुदित नादबिन्दुनवयौव्वनाम्
मातृकां त्रिपुरसुन्दरीं मनसि भावयामिपरदेवताम्।।

२) मायाविलासहसितं श्वसितं समीरो
जिह्वाजलं वचनमीश शकुन्त पह्क्तिः।
सिद्धदयः स्वरगणा मुखरन्ध्रमग्नि
देवा भुजाः स्तनयुगं तव धर्मदेवः।।

३) स्मेरचारुमुखमण्डलां विमलगण्डलंम्बिमणिमण्डलाम्
हारदामपरिशोभमानकुचभरभीरुतनुमध्यमाम्।
वीरगर्वहरनूपुरां विविध कारणेशवरपीठिकाम्
मारवैरिसहचारिणीं मनसि भावयामिपरदेवताम्।।

४० वासुदेव तव भासमानमिहरासकेलिरस सौरभम्
दूरतोपि खलु नारदागदिदमाकलय्य कुतुकाकुल।
वेषभूषणविलासपेशलविलासिनीशतसमावृता
नाकतो युगपदागता वियति वेगतोऽथसुरमण्डली।।

५) विबुध्य च त्वं जलगर्भशायिन्
विलोक्य लोकाखिलान् प्रलीनान्।
तेष्वेव सूक्ष्मात्मतया निजान्तः
स्थितेषु विश्वेश ददाथ दृष्टिम्।।

# मूढः शशकः



कस्मिश्चित् वने कश्चन किटु शशकः वसति स्म।तस्य मित्रम् आसीत् मिटु नाम कच्छपः।





एकदा वने कायिक स्पर्धा प्रचलिता। मिटु किटु च मिथः धानवनस्पर्धा आरभत।





किटु शशकः किञ्चित् दूरं गत्वा पृष्ठतः पश्यति तदा मिटु मन्दं मन्दम् आगच्छति





किञ्चित् समयं शयनं कृत्वा शीघ्रं लक्ष्यस्थानं प्राप्यामि। शशकः अनेक समयः शयनं कृतवान्।





तस्मिन् समये मिटु कच्छप सम्मानजेता आसीत्



लज्जितः किटु शशकः शीघ्रं पलायिताः। (अनश्वरा एन् .पि)

## प्रहेलिकाः

१) एतत् सुन्दरी वने तिष्ठति स्पर्शनमात्रे स्वपिति सुन्दरी का?
लज्जावती।

२) बकः तिष्ठति वापि शुष्यति।
दीपः

३) त्रिनेत्रः विपणीं गतवान्।
नारिकेलम्।

४) एकपादो विपणीं गतवान्।
छत्रम्।

५) अङ्कणमञ्चुषा निरावरणा।
कूपः

६) माता स्पर्शनं पुत्रं मरणम्।
अग्निपेटिका

७) अस्ति नास्ति शिरो नास्ति बहुरस्ति निरङ्गुलिः
आपदो नरभक्षी च किम् वदा।
युतकम्।

८) एक कुप्प्यां तैलद्वयम्।
अण्डम्।

९) वृषभः शेते रज्जुः धावति।
कुश्माण्डम्।

## पदप्रशनः

**दक्षिणतः**

१) आदिकाव्यम् किम्?
२) वाग् इति पदस्य अपरं नामम्?
३) भारतीयभाषाणां जननी का?
४) आकाशं इति पदस्य अन्य पदम्।

**अधः**

१) विश्रवसः पुत्रः।
२) एकं आभरणम्।
३) एकं पोषक समृद्धं पानीयम्।
४) आकाश मार्गे सञ्चारयोग्यं वाहनम्।

| | | | | |
|---|---|---|---|---|
| १ | २ | ३य | | X |
| व | | २ | णी | ४ |
| | X | | X | |
| २) | स्कृ | | ४ | |